# bRihatpArAsharahorAshAstram 11-20

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૧૧-૨૦

## Document Information

Text title : bRihatpArAsharahorAshAstram.h 11-20

File name : par1120.itx

Category : jyotisha, sociology_astrology, bRihatpArAshara

Location : doc_z_misc_sociology_astrology

Transliterated by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Proofread by : Ahto Jarve, Ginda Lass

Latest update : December 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 30, 2021

*sanskritdocuments.org*

bRihatpArAsharahorAshAstram 11-20

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૧૧-૨૦

## અથ ભાવવિવેકાધ્યાયઃ ॥ ૧૧॥

અરિષ્ટં તત્પ્રભઙ્ગં ચ શ્રુતં ત્વત્તો મયા મુને ।
કસ્માદ્ ભાવાત્ ફલં કિં કિં વિચાર્યમિતિ મે વદ ॥ ૧॥

દેહં રૂપં ચ જ્ઞાનં ચ વર્ણં ચૈવ બલાબલમ્ ।
સુખં દુઃખં સ્વભાવઞ્ચ લગ્નભાવાન્નિરીક્ષયેત્ ॥ ૨॥

ધનધાન્યં કુટુમ્બાંશ્ચ મૃત્યુજાલમમિત્રકમ્ ।
ધાતુરત્નાદિકં સર્વં ધનસ્થાનાન્નિરીક્ષયેત્ ॥ ૩॥

વિક્રમં ભૃત્યભ્રાત્રાદિ ચોપદેશપ્રયાણકમ્ ।
પિત્રોર્વૈ મરણં વિજ્ઞો દુશ્ચિક્યાચ્ચ નિરીક્ષયેત્ ॥ ૪॥

વાહનાન્યથ બન્ધૂંશ્ચ માતૃસૌખ્યાદિકાન્યપિ ।
નિધિ ક્ષેત્રં ગૃહં ચાપિ ચતુર્થાત્ પરિચિન્તયેત્ ॥ ૫॥

યન્ત્રમન્ત્રૌ તથા વિદ્યાં બુદ્ધેશ્ચૈવ પ્રબન્ધકમ્ ।
પુત્રરાજ્યાપભ્રાંશાદીન્ પશ્યેત્ પુત્રાલયાદ્ બુધઃ ॥ ૬॥

માતુલાન્તકશઙ્કાનાં શત્રૂંશ્ચૈવ વ્રણાદિકાન્ ।
સપત્નીમાતરં ચાપિ ષષ્ઠભાવાન્નિરીક્ષયેત્ ॥ ૭॥

જાયામધ્વપ્રયાણં ચ વાણિજ્યં નષ્ટવીક્ષણમ્ ।
મરણં ચ સ્વદેહસ્ય જાયાભાવાન્નિરીક્ષયેત્ ॥ ૮॥

આયુ રણં રિપું ચાપિ દુર્ગં મૃતધનં તથા ।
ગત્યનુકાદિકં સર્વં પશ્યેદ્રન્ધ્રાદ્વિચક્ષણઃ ॥ ૯॥

ભાગ્યં શ્યાલં ચ ધર્મં ચ ભ્રાતૃપત્ન્યાદિકાંસ્તથા ।
તીર્થયાત્રાદિકં સર્વં ધર્મસ્થાનાન્નિરીક્ષયેત્ ॥ ૧૦॥

રાજ્યં ચાકાશંવૃત્તિં ચ માનં ચૈવ પિતુસ્તથા ।
પ્રવાસસ્ય ઋણસ્યાપિ વ્યોમસ્થાનાન્નિરીક્ષણમ્ ॥ ૧૧॥

નાનાવસ્તુભવસ્યાપિ પુત્રજાયાદિકસ્ય ચ ।
આયં વૃદ્ધિં પશૂનાં ચ ભવસ્થાનાન્નિરીક્ષણમ્ ॥ ૧૨॥

વ્યયં ચ વૈરિવૃત્તાન્તરિઃફમન્ત્યાદિકં તથા ।
વ્યયાચ્ચૈષ હિ જ્ઞાતવ્યમિનિ સર્વત્ર ધીમતા ॥ ૧૩॥

યો યો શુભૈર્યુતો દૃષ્ટો ભાવો વા પતિદૃષ્ટયુક્ ।
યુવા પ્રવૃદ્ધો રાજ્યસ્થઃ કુમારો વાઽપિ યત્પતિઃ ॥ ૧૪॥

તદીક્ષણવશાત્ તત્તદ્ભાવસૌખ્યં વદેદ્ બુધઃ ।
યદ્યદ્ ભાવપતિર્નષ્ટસ્ત્રિકેશાદ્યૈશ્ચ સંયુતઃ ॥ ૧૫॥

ભાવં ન વીક્ષતે સમ્યક્ સુપ્તો વૃદ્ધોમૃતોઽથવા ।
પીડિતો વાઽસ્ય  ભાવસ્ય ફલં નષ્ટં વદેદ્ ધ્રુવમ્ ॥ ૧૬॥

## અથ તનુભાવફલાધ્યાયઃ ॥ ૧૨॥

સપાપો દેહપોઽષ્ટારિવ્યયગો દેહસૌખ્યહૃત્ ।
કેન્દ્રે કોણે સ્થિતોઽઙ્ગેશઃ સદા દેહસુખં દિશેત્ ॥ ૧॥

લગ્નપોઽસ્તઙ્ગતો નીચે શત્રુભે રોગકૃદ્ ભવેત્ ।
શુભઃ કેન્દ્રત્રિકોણસ્થા સર્વરોગહરાઃ સ્મૃતાઃ ॥ ૨॥

લગ્ને ચન્દ્રેઽથવ ક્રૂરગ્રહૈર્દૃષ્ટેઽથવા યુતે ।
શુભદૃષ્ટિવિહીને ચ જન્તોર્દેહસુખં ન હિ ॥ ૩॥

લગ્ને સૌમ્યે સુરૂપઃ સ્યાત્ ક્રૂરેરૂપવિવર્જિતઃ ।
સૌમ્યખેટૈર્યુતે દૃષ્ટે લગ્ને દેહસુખાન્વિતઃ ॥ ૪॥

લગ્નેશો જ્ઞા ગુરુર્વાઽપિ શુક્રો વા કેન્દ્રકોણગઃ ।
દીર્ઘાયુર્ધનવાન્ જાતો બુદ્ધિમાન્ રાજવલ્લભઃ ॥ ૫॥

લગ્નેશે ચરરાશિસ્થે શુભગ્રહનિરીક્ષિતે ।
કીર્તિશ્રીમાન્ મહાભોગી દેહસૌખ્યસમન્વિતઃ ॥ ૬॥

બુધો જીવોઽથવા શુક્રો લગ્ને ચન્દ્રસમન્વિતઃ ।

લગ્નાત્ કેન્દ્રગતો વાઽપિ રાજલક્ષણસંયુતઃ ॥ ૭॥

સસૌરે સકુજે વાપિ લગ્ને મેષે વૃષે હરૌ ।
રાશ્યંશસદૃશૌ ગાત્રે સ જાતો નાલવિષ્ટિતઃ ॥ ૮॥

ચતુષ્પદગતો ભાનુઃ પરે વીર્યસમન્વિતાઃ ।
દ્વિસ્વભાવગતા જાતૌ યમલાવિતિ નિર્દિશેત્ ॥ ૯॥

રવીન્દૂ એકભાવસ્થાવેકંશકસમન્વિતૌ ।
ત્રિમાત્રા ચ ત્રિભિર્માસૈઃ પિત્રા ભ્રાત્રા ચ પોષિતઃ ॥ ૧૦॥

એવમેવ ફલં વાચ્યં ચન્દ્રાદપિ સદા બુધૈઃ ।
અથ જાતનરસ્યાઙ્ગે વ્રણચિહ્નાદિકં બ્રુવે ॥ ૧૧॥

શિરો નેત્રે તથા કર્ણૌ નાસિકે ચ કપોલકૌ ।
હનૂર્મુખં ચ લગ્નાદ્યા તનાવાદ્યદૃકાણકે ॥ ૧૨॥

મધ્યદ્રેષ્કાણગે લગ્ને કણ્ઠોંઽસૌ ચ ભુજૌ તથા ।
પાર્શ્વે ચ હૃદયે ક્રોડે નાભિશ્ચેતિ યથાક્રમમ્ ॥ ૧૩॥

વસ્તિર્લિઙ્ગગુદે મુષ્કાવૂરૂ જાનૂ ચ જઙ્ઘકે ।
પાદશ્ચેત્યુદિતૈર્વામમઙ્ગં જ્ઞેયં તૃતીયકે ॥ ૧૪॥

યસ્મિન્નઙ્ગે સ્થિતઃ પાપો વ્રણં તત્ર સમાદિશેત્ ।
નિયતં સબુધૈઃ ક્રૂરૈઃ સૌમ્યૈર્લક્ષ્મ વદેદ્ બુધઃ ॥ ૧૫॥

## અથ ધનભાવફલાધ્યાયઃ ॥ ૧૩॥

ધનભાવફલં વચ્મિ શ ૃણુ ત્વં દ્વિજસત્તમ ।
ધનેશો ધનભાવસ્થઃ કેન્દ્રકોણગતોઽપિ વા ॥ ૧॥

ધનવૃદ્ધિકરો જ્ઞેયસ્ત્રિકસ્થો ધનહાનિકૃત્ ।
ધનદશ્ચ ધને સૌમ્યઃ પાપો ધનવિનાશકૃત્ ॥ ૨॥

ધનાધિપો ગુરુર્યસ્ય ધનભાવગતો ભવેત્ ।
ભૌમેન સહિતો વાઽપિ ધનવાન્ સ નરો ભવેત્ ॥ ૩॥

ધનેશે લાભભાવસ્થે લાભેશે વા ધનં ગતે ।
તાવુભૌ કેન્દ્રકોણસ્થૌ ધનવાન્ સ નરો ભવેત્ ॥ ૪॥

ધનેશે કેન્દ્રરાશિસ્થે લાભેશે તત્રિકોણગે ।
ગુરુશુક્રયુતે દૃષ્ટે ધનલાભમુદીરયેત્ ॥ ૫॥

ધનેશો રિપુભાવસ્થો લાભેશસ્તદ્ગતો યદિ ।
ધનાયૌ પાપયુક્તૌ વા દૃષ્ટૌ નિર્ધન એવ સઃ ॥ ૬॥

ધનલાભાધિપાવસ્તૌ પાપગ્રહસમન્વિતૌ ।
જન્મપ્રભૃતિદારિદ્રં ભિક્ષાન્નં લભતે નરઃ ॥ ૭॥

ષષ્ઠેઽષ્ટમે વ્યયે વાઽપિ ધનલાભાધિપૌ યદિ ।
લાભે કુજોધને રાહૂ રાજદણ્ડાદ્ ધનક્ષયઃ ॥ ૮॥

લાભે જીવે ધને શુક્રે ધનેશે શુભસંયુતે ।
વ્યયે ચ શુભસંયુક્તે ધર્મકાર્યે ધનવ્યયઃ ॥ ૯॥

સ્વભોચ્ચસ્થે ધનાધીશે જાતકો જનપોષકઃ ।
પરોપકારી ખ્યાતશ્ચ વિજ્ઞેયો દ્વિજસત્તમ ॥ ૧૦॥

સ્થિતે પારાવતાંશાદૌ ધનેશે શુભસંયુતે ।
તદ્ગૃહે સર્વસમ્પત્તિર્વિનાઽયાસેન જાયતે ॥ ૧૧॥

નેત્રેશે બલસંયુક્તે શોભનાક્ષો ભવેન્નરઃ ।
ષષ્ઠાષ્ટમવ્યયસ્થે ચ નેત્રવૈકલ્યવાન્ ભવેત્ ॥ ૧૨॥

ધનેશે પાપસંયુક્તે ધને પાપસમન્વિતે ।
પિશુનોઽસત્યવાદી ચ વાતવ્યાધિસમન્વિતઃ ॥ ૧૩॥

## અથ સહજભાવફલાધ્યાયઃ ॥ ૧૪॥

અથ વિક્રમભાવસ્ય ફલં વક્ષ્યામિ ભો દ્વિજ ।
સહજે સૌમ્યયુગ્દૃષ્ટે ભ્રાતૃમાન્ વિક્રમી નરઃ ॥ ૧॥

સભૌમો ભ્રાતૃભાવેશો ભ્રાતૃભાવં પ્રપશ્યતિ ।
ભ્રાતૃક્ષેત્રગતો વાઽપિ ભ્રાતૃભાવં વિનિર્દિશેત્ ॥ ૨॥

પાપયોગેન તૌ પાપક્ષેત્રયોગેન વા પુનઃ ।
ઉત્પાટ્ય સહજાન્ સદ્યો નિહન્તરૌ ન સંશયઃ ॥ ૩॥

સ્ત્રીગ્રહો ભ્રાતૃભાવેશઃ સ્ત્રીગ્રહો ભ્રાતૃભાવગઃ ।

ભગિની સ્યાત્ તથા ભ્રાતા પુઙ્ગૃહે પુઙ્ગ્રહો યદિ ॥ ૪॥

મિશ્રે મિશ્રફલં વાચ્યં બલાબલવિનિર્ણયાત્ ।
મૃતૌ કુજતૃતીયેશૌ સહોદરવિનાશકૌ ॥ ૫॥

કેન્દ્રત્રિકોણગે વાઽપિ સ્વોચ્ચમિત્રસ્વવર્ગગે ।
કારકે સહજેશે યા ભ્રાતૃસૌખ્યં વિનિર્દિશેત્ ॥ ૬॥

ભ્રાતૃભે બુધસંયુક્તે તદીશે ચન્દ્રસંયુતે ।
કારકે મન્દસંયુક્તે ભગિન્યેકાગ્રતો ભવેત્ ॥ ૭॥

પશ્ચાત્ સહોદરોઽપ્યેકસ્તૃતીયસ્તુ મૃતો ભવેત્ ।
કારકે રાહુસંયુક્તે સહજેશે તુ નીચગે ॥ ૮॥

પશ્ચાત્ સહોદરાભાવં પૂર્વં તુ તત્ત્રયં વદેત્ ।
ભ્રાતૃસ્થાનાધિપે કેન્દ્રે કારકે તત્ત્રિકોણગે ॥ ૯॥

જીવેન સહિતે ચોચ્ચે જ્ઞેયા દ્વાદશ સોદરાઃ ।
તત્ર જ્યેષ્ઠદ્વિયં તદ્વજ્જાતકાચ્ચ તૃતીયકમ્ ॥ ૧૦॥

સપ્તમં નવમં ચૈવ દ્વાદશં ચ મૃતં વદેત્ ।
શેષાઃ સહોદરાઃ ષડ્ વૈ ભવેયુર્દીર્ઘજીવનાઃ ॥ ૧૧॥

વ્યયેશેન યુતો ભૌમો ગુરુણા સહિતોઽપિ વા ।
ભ્રાતૃભાવે સ્થિતે ચન્દ્રે સપ્તસઙ્ખ્યાસ્તુ સોદરાઃ ॥ ૧૨॥

ભ્રાતૃસ્થાને શશિયુતે કેવલં પુઙ્ગ્રહેક્ષિતે ।
સહજા ભ્રાતરો જ્ઞેયાઃ શુક્રયુક્તેક્ષિતેઽન્યથા ॥ ૧૩॥

અગ્રે જાતં રવિર્હન્તિ પૃષ્ઠે જાતં શનૈશ્ચરઃ ।
અગ્રજં પૃષ્ઠજં હન્તિ સહજસ્થો ધરાસુતઃ ॥ ૧૪॥

એતેષાં વિપ્ર યોગાનાં બલાબલવિનિર્ણયાત્ ।
ભ્રાતૃણાં ભગિનીનાં વા જાતકસ્ય ફલં વદેત્ ॥ ૧૫॥

## અથ સુખભાવફલાધ્યાયઃ ॥ ૧૫॥

ઉક્તં તૃતીયભાવસ્ય ફલં સઙ્ક્ષેપતો મયા ।
સુખભાવફલં ચાઽથ કથયામિ દ્વિજોત્તમ ॥ ૧॥

સુખેશે સુખભાવસ્થે લગ્નેશે તદ્ગતેઽપિ વા ।
શુભદૃષ્ટે ચ જાતસ્ય પૂર્ણં ગૃહસુખં વદેત્ ॥ ૨॥

સ્વગેહે સ્વાંશકે સ્વોચ્ચે સુખસ્થાનાધિપો યદિ ।
ભૂમિયાનગૃહાદીનાં સુખં વાદ્યભવં તથા ॥ ૩॥

કર્માધિપેન સંયુક્તે કેન્દ્રે કોણે ગૃહાધિપે ।
વિચિત્રસૌધપ્રાકારૈર્મણ્ડિતં તદ્ગૃહં વદેત્ ॥ ૪॥

બન્ધુસ્થાનેશ્વરે સૌમ્યે શુભગ્રહયુતેક્ષિતે ।
શશિજે લગ્નસંયુક્તે બન્ધુપૂજ્યો ભવેન્નરઃ ॥ ૫॥

માતુઃસ્થાને શુભયુતે તદીશે સ્વોચ્ચરાશિગે ।
કારકે બલસંયુક્તે માતુર્દીર્ઘાયુરાદિશેત્ ॥ ૬॥

સુખેશે કેન્દ્રભાવસ્થે તથા કેન્દ્રસ્થિતો ભૃગુઃ ।
શશિજે સ્વોચ્ચરાશિસ્થે માતુઃ પૂર્ણં સુખં વદેત્ ॥ ૭॥

સુખે રવિયુતે મન્દે ચન્દ્રે ભાગ્યગતે સતિ ।
લાભસ્થાનગતો ભૌમો ગોમહિષ્યાદિલાભકૃત્ ॥ ૮॥

ચરગેહસમાયુક્તો સુખે તદ્રાશિનાયકે ।
ષષ્ઠે વ્યયે સ્થિતે ભૌમે નરઃ પ્રાપ્નોતિ મૂકતામ્ ॥ ૯॥

લગ્નસ્થાનાધિપે સૌમ્યે સુખેશે નીચરાશિગે ।
કારકે વ્યયભાવસ્થે સુખેશે લાભસઙ્ગતે ॥ ૧૦॥

દ્વદશે વત્સરે પ્રાપ્તે વાહનસ્ય સુખં વદેત્ ।
વાહને સૂર્યસંયુક્તે સ્વોચ્ચે તદ્ભાવનાયકે ॥ ૧૧॥

શુક્રેણ સંયુતે વર્ષે દ્વાત્રિંશે વાહનં ભવેત્ ।
કર્મેશેન યુતે બન્ધુનાથે તુઙ્ગાંશસંયુતે ॥ ૧૨॥

દ્વિચત્વારિંશકે વર્ષે નરો વાહનભાગ્ ભવેત્ ।
લાભેશે સુખરાશિસ્થે સુખેશે લાભસંયુતે ॥ ૧૩॥

દ્વાદશે વસ્તરે પ્રાપ્તે જાતો વાહનભાગ્ ભવેત્ ।
શુભં શુભત્વે ભાવસ્ય પાપત્વે ફલમન્યથા ॥ ૧૪॥

## અથ પઞ્ચમભાવફલાધ્યાયઃ ॥ ૧૬॥

અથ પઞ્ચમભાવસ્ય કથયામિ ફલં દ્વિજ ।
લગ્નપે સુતભાવસ્થે સુતપે ચ સુતે સ્થિતે ॥ ૧॥

કેન્દ્રત્રિકોણસંસ્થે વા પૂર્ણં પુત્રસુખં વદેત્ ।
ષષ્ઠાષ્ટમવ્યયસ્થે તુ સુતાધીશે ત્વપુત્રતા ॥ ૨॥

સુતેશેસ્તઙ્ગતે વાઽપિ પાપાક્રાન્તે ચ નિર્બલે ।
તદા ન જાયતે પુત્રો જાતો વા મ્રિયતે ધ્રુવમ્ ॥ ૩॥

ષષ્ઠસ્થાને સુતાધીશે લગ્નેશે કુજસંયુતે ।
મ્રિયતે પ્રથમાપત્યં કાકબન્ધ્યા ચ ગેહિની ॥ ૪॥

સુતાધીશો હિ નીચસ્થો વ્યયષષ્ઠાષ્ટમસ્થિતઃ ।
કાકબન્ધ્યા ભવેન્નારી સુતે કેતુબુધૌ યદિ ॥ ૫॥

સુતેશો નીચગો યત્ર સુતસ્થાનં ન પશ્યતિ ।
તત્ર સૌરિબુધૌ સ્યાતાં કાકબન્ધ્યાત્વમાપ્નુયાત્ ॥ ૬॥

ભાગ્યેશો મૂર્તિવર્તી ચેત્ સુતેશો નીચગો યદિ ।
સુતે કેતુબુધૌ સ્યાતાં સુતં કષ્ટાદ્ વિનિર્દિશેત્ ॥ ૭॥

ષષ્ઠાષ્ટમવ્યયસ્થો વા નીચો વા શત્રુરાશિગઃ ।
સુતેશશ્ચ સુતે તસ્ય કષ્ટાદ્ પુત્રં વિનિર્દિશેત્ ॥ ૮॥

પુત્રભાવે બુધક્ષેત્રે મન્દક્ષેત્રેઽથવા પુનઃ ।
મન્દે માન્દિયુતૌ દૃષ્ટે તદા દત્તાદયઃ સુતાઃ ॥ ૯॥

રવિચન્દ્રૌ યદૈકસ્થાવેકાંશકસમન્વિતૌ ।
ત્રિમાતૃભિરસૌ યાદ્વા દ્વિપિત્રાઽપિ ચ પોષિતઃ ॥ ૧૦॥

પઞ્ચમે ષડ્ગ્રહૈર્યુક્તે તદીશે વ્યયરાશિગે ।
લગ્નેશેન્દૂ બલાઢ્યૌ ચેત્ તદા દત્તસુતોદ્ભવઃ ॥ ૧૧॥

સુતે જ્ઞજીવશુક્રૈશ્ચ સબલૈરવલોકિતે ।
ભવન્તિ બહવઃ પુત્રાઃ સુતેશે હિ બલાન્વિતે ॥ ૧૨॥

સુતેશે ચન્દ્રસંયુક્તે તદ્દ્રેષ્કાણગતેઽપિ વા ।
તદા હિ કન્યકોત્પત્તિઃ પ્રવદેદ્ દૈવચિન્તકઃ ॥ ૧૩॥

સુતેશે ચરરાશિસ્થે રાહુણા સહિતે વિધૌ ।
પુત્રસ્થાનઃ ગતે મન્દે પરજાતં વદેચ્છિશુમ્ ॥ ૧૪॥

લગ્નાદષ્ટમગે ચન્દ્રે ચન્દ્રાદષ્ટમગે ગુરૌ ।
પાપગ્રહૈર્યુતે દૃષ્ટે પરજાતો ન સંશયઃ ॥ ૧૫॥

પુત્રસ્થાનાધિપે સ્વોચ્ચે લગ્નાદ્વા દ્વિત્રિકોણગે ।
ગુરુણા સંયુતે દૃષ્ટે પુત્રભાગ્યમુપૈતિ સઃ ॥ ૧૬॥

ત્રિચતુઃપાપસંયુક્તે સુતે સૌમ્યવિવર્જિતે ।
સુતેશે નીચરાશિસ્થે નીચસંસ્થૌ ભવેચ્છિશુઃ ॥ ૧૭॥

પુત્રસ્થાનં ગતે જીવે તદીશે ભૃગુસંયુતે ।
દ્વાત્રિંશે ચ ત્રયસ્ત્રિંશે વત્સરે પુત્રસમ્ભવઃ ॥ ૧૮॥

સુતેશે કેન્દ્રભાવસ્થે કારકેણ સમન્વિતે ।
ષડ્ત્રિંશે ત્રિંશદબ્દે ચ પુત્રોત્પત્તિં વિનિર્દિશેત્ ॥ ૧૯॥

લગ્નાદ્ ભાગ્યગતે જીવે જીવાદ્ ભાગ્યગતે ભૃગૌ ।
લગ્નેશે ભૃગુયુક્તે વા ચત્વારિંશે સુતં વદેત્ ॥ ૨૦॥

પુત્રસ્થાનં ગતે રાહૌ તદીશે પાપસંયુતે ।
નીચરાશિગતો જીવો દ્વાત્રિંશે પુત્રમૃત્યુદઃ ॥ ૨૧॥

જીવાત્ પઞ્ચમગે પાપે લગ્નાત્ પઞ્ચમગેઽપિ ચ ।
ષડ્ત્રિંશે ચ ત્રયસ્ત્રિંશે ચત્વારિંશે સુતક્ષયઃ ॥ ૨૨॥

લગ્ને માન્દિતમાયુક્તે લગ્નેશે નીચરાશિગે ।
ષડ્પઞ્ચાશત્તમેઽબ્દે ચ પુત્રશોકસમાકુલઃ ॥ ૨૩॥

ચતુર્થે પાપસંયુક્તે ષષ્ઠભાવે તથૈવ હિ ।
સુતેશે પરમોચ્ચસ્થે લગ્નેશેન સમન્વિતે ॥ ૨૪॥

કારકે શુભસંયુક્તે દશસઙ્ખ્યાસ્તુ સૂનવઃ ।
પરમોચ્ચગતે જીવે ધનેશે રાહુસંયુતે ॥ ૨૫॥

ભાગ્યેશે ભાગ્યસંયુક્તે સઙ્ખ્યાતા નવ સૂનવઃ ।
પુત્રભાગ્યગતે જીવે સુતેશે બલસંયુતે ॥ ૨૬॥

ધનેશે કર્મભાવસ્થે વસુસઙ્ખ્યાસ્તુ સૂનવઃ ।
પઞ્ચમાત્ પઞ્ચમે મન્દે સુતસ્થે ચ તદીશ્વરે ॥ ૨૭॥

સૂનવઃ સપ્તસઙ્ખ્યશ્ચ દ્વિગર્ભે યમલૌ વદેત્ ।
વિત્તેશે પઞ્ચમસ્થાને સુતસ્થે ચ સુતાધિપે ॥ ૨૮॥

જાયન્તે ષટ્ સુતાસ્તસ્ય તેષાં ચ ત્રિપ્રજામૃતિઃ ।
મન્દાત્ પઞ્ચમગે જીવે જીવાત્ પઞ્ચમગે શનૌ ॥ ૨૯॥

સુતભે પાપસંયુક્તે પુત્રમેકં વિનિર્દિશેત્ ।
પઞ્ચમે પાપયુક્તે વા જીવાત્ પઞ્ચમગે શનૌ ॥ ૩૦॥

પત્ન્યન્તરે પુત્રલાભં કલત્રત્રયભાગ્ ભવેત્ ।
પઞ્ચમે પાપસંયુક્તે જીવાત્ પઞ્ચમગે શનૌ ॥ ૩૧॥

લગ્નેશે ધનભાવસ્થે સુતેશો ભૌમસંયુતઃ ।
જાતં જાતં શિશુંહન્તિ દીર્ઘાયુશ્ચ સ્વયં ભવેત્ ॥ ૩૨॥

## અથ ષષ્ઠભાવફલાધ્યાયઃ ॥ ૧૭॥

અથ વિપ્ર ફલં વક્ષ્યે ષષ્ઠભાવસમુદ્ભવમ્ ।
દેહે રોગવ્રણાદ્યં તત્ શ્રૂયતામેકચેતસા ॥ ૧॥

ષષ્ઠાધિપઃ સ્વગેહે વા દેહે વાઽપ્યષ્ટમે સ્થિતઃ ।
તદા વ્રણા ભવેદ્દેહે ષષ્ઠરાશિસમાશ્રિતે ॥ ૨॥

એવં પિત્રાદિભાવેશાસ્તત્તત્કારકસંયુતાઃ ।
વ્રણાધિપયુતાશ્ચાપિ ષષ્ઠાષ્ટમયુતા યદિ ॥ ૩॥

તેષામપિ વ્રણં વાચ્યમાદિત્યેન શિરોવ્રણમ્ ।
ઇન્દુના ચ મુખે કણ્ઠે ભૌમેન જ્ઞેન નાભિષુ ॥ ૪॥

ગુરુણા નાસિકાયાં ચ ભૃગુણા નયને પદે ।
શનિના રાહુણા કુક્ષૌ કેતુના ચ તથા ભવેત્ ॥ ૫॥

લગ્નાધિપઃ કુજક્ષેત્રે બુધભે યદિ સંસ્થિતઃ ।
યત્ર કુત્ર સ્થિતો જ્ઞેન વીક્ષિતો મુખરુક્પ્રદઃ ॥ ૬॥

લગ્નાધિપૌ કુજબુધૌ ચન્દ્રેણ યદિ સંયુતૌ ।
રાહુણા શનિના સાર્દ્ધં કુષ્ઠં તત્ર વિનિર્દિશેત્ ॥ ૭॥

લગ્નાધિપં વિના લગ્ને સ્થિતશ્ચેત્તમસા શશી ।
સ્વેતકુષ્ઠં તદા કૃષ્ણકુષ્ઠં ચ શનિના સહ ॥ ૮॥

કુજેન રક્તકુષ્ઠં સ્યાત્તત્તદેવં વિચારયેત્ ।
લગ્ને ષષ્ઠાષ્ટમાધીશૌ રવિણા યદિ સંયુતૌ ॥ ૯॥

જ્વરગણ્ડઃ કુજે ગ્રન્થિઃ શસ્ત્રવ્રણમથાપિ વા ।
બુધેન પિત્તં ગુરુણા રોગાભાવં વિનિર્દિશેત્ ॥ ૧૦॥

સ્ત્રીભિઃ શુક્રેણ શશિના વાયુના સંયુતો યદિ ।
ગણ્ડશ્ચાણ્ડાલતો નાભૌ તમઃકેતુયુતે ભયમ્ ॥ ૧૧॥

ચન્દ્રેણ ગણ્ડઃ સલિલૈઃ કફશ્લેષ્માદિના ભવેત્ ।
એવં પિત્રાદિભાવાનાં તત્તત્કારકયોગતઃ ॥ ૧૨॥

ગણ્ડં તેષાં વદેદેવમૂહ્યમત્ર મનીષિભિઃ ।
રોગસ્થાનગતે પાપે તદીશે પાપસંયુતે ॥ ૧૩॥

રાહુણા સંયુતે મન્દે સર્વદા રોગસંયુતઃ ।
રોગસ્થાનગતે ભૌમે તદીશે રંધ્રસંયુતે ॥ ૧૪॥

ષડ્વર્ષે દ્વાદશે વર્ષે જ્વરરોગી ભવેન્નરઃ ।
ષષ્ઠસ્થાનગતે જીવે તદ્ગૃહે ચન્દ્રસંયુતે ॥ ૧૫॥

દ્વાવિંશૌકોનવિંશેઽબ્દે કુષ્ઠરોગં વિનિર્દિશેત્ ।
રોગસ્થાનં ગતો રાહુઃ કેન્દ્રે માન્દિસમન્વિતે ॥ ૧૬॥

લગ્નેશે નાશરાશિસ્થે ષડ્વિંશે ક્ષયરોગતા ।
વ્યયેશે રોગરાશિસ્થે તદીશે વ્યયરાશિગે ॥ ૧૭॥

ત્રિંશદ્વર્ષૈકોનવર્ષે ગુલ્મરોગં વિનિર્દિશેત્ ।
રિપુસ્થાનગતે ચન્દ્રે શશિના સંયુતે સતિ ॥ ૧૮॥

પઞ્ચપઞ્ચાશદબ્દેષુ રક્તકુષ્ઠં વિનિર્દિશેત્ ।
લગ્નેશે લગ્નરાશિસ્થે મન્દે શત્રુસમન્વિતે ॥ ૧૯॥

એકોનષષ્ટિવર્ષે તુ વાતરોગાર્દિતો ભવેત્ ।
રંધ્રેશે રિપુરાશિસ્થે વ્યયેશે લગ્નસંસ્થિતે ॥ ૨૦॥

ચન્દ્રે ષષ્ઠેશસંયુક્તે વસુવર્ષે મૃગાદ્ભયમ્ ।
ષષ્ઠાષ્ટમગતો રહુસ્તસ્માદષ્ટગતે શનૌ ॥ ૨૧॥

જાતસ્ય જન્મતો વિપ્ર પ્રથમે ચ દ્વિતીયકે ।
વત્સરેઽગ્નિભયં તસ્ય ત્રિવર્ષે પક્ષિદોષભાક્ ॥ ૨૨॥

ષષ્ઠાષ્ટમગતે સૂર્યે તદ્વ્યયે ચન્દ્રસંયુતઃ ।
પઞ્ચમે નવમેઽબ્દે તુ જલભીતિં વિનિર્દિશેત્ ॥ ૨૩॥

અષ્ટમે મન્દસંયુક્તે તસ્માદ્વા દ્વાદશે કુજઃ ।
ત્રિંશાબ્દે દશમેઽબ્દે તુ સ્ફોટકાદિ વિનિર્દિશેત્ ॥ ૨૪॥

રંધ્રેશે રાહુસંયુક્તે તદંશે રંધ્રકોણગે ।
દ્વાવિંશેઽષ્ટાદશે વર્ષે ગ્રન્થિમેહાદિપીડનમ્ ॥ ૨૫॥

લાભેશે રિપુભાવસ્થે રોગેશે લાભરાશિગે ।
એકત્રિંશત્સમે વર્ષે શત્રુમૂલાદ્ધનવ્યયઃ ॥ ૨૬॥

સુતેશે રિપુભાવસ્થે ષષ્ઠેશે ગુરુસંયુતે ।
વ્યયેશે લગ્નભાવસ્થે તસ્ય પુત્રો રિપુર્ભવેત્ ॥ ૨૭॥

લગ્નેશે ષષ્ઠરાશિસ્થે તદીશે ષષ્ઠરાશિગે ।
દશમૈકોનવિંશેઽબ્દે શુનકાદ્ભીતિરુચ્યતે ॥ ૨૮॥

## અથ જાયાભાવફલાધ્યાયઃ ॥ ૧૮॥

જાયાભાવફલં વક્ષ્યે શૃણુ ત્વં દ્વિજસત્તમ ।
જાયાધિપે સ્વભે સ્વોચ્ચે સ્ત્રીસુખં પૂર્ણમાદિશેત્ ॥ ૧॥

કલત્રપો વિના સ્વર્ક્ષં વ્યયષષ્ઠાષ્ટમસ્થિતઃ ।
રોગિણીં કુરુતે નારીં તથા તુઙ્ગાદિકં વિના ॥ ૨॥

સપ્તમે તુ સ્થિતે શુક્રેઽતીવકામી ભવેન્નરઃ ।
યત્રકુત્રસ્થિતે પાપયુતે સ્ત્રીમરણં ભવેત્ ॥ ૩॥

જાયાધીશઃ શુભૈર્યુક્તો દૃષ્ટો વા બલસંયુતઃ ।
તદા જાતો ધની માની સુખસૌભાગ્યસંયુતઃ ॥ ૪॥

નીચે શત્રુગૃહેઽસ્તે વા નિર્બલે ચ કલત્રપે ।
તસ્યાપિ રોગિણી ભાર્યા બહુભાર્યો નરો ભવેત્ ॥ ૫॥

મન્દભે શુક્રગેહે વા જાયાધીશે શુભેક્ષિતે ।
સ્વોચ્ચગે તુ વિશેષેણ બહુભાર્યો નરો ભવેત્ ॥ ૬॥

વન્ધ્યાસઙ્ગો મદે ભાનૌ ચન્દ્રે રાશિસમસ્ત્રિયઃ ।
કુજે રજસ્વલાસઙ્ગો વન્ધ્યાસઙ્ગશ્ચ કીર્તિતઃ ॥ ૭॥

બુધે વેશ્યા ચ હીના ચ વણિક્ સ્ત્રી વા પ્રકીર્તિતા ।
ગુરૌ બ્રાહ્મણભાર્યા સ્યાદ્ગર્ભિણીસઙ્ગ એવ ચ ॥ ૮॥

હીના ચ પુષ્પિણી વાચ્યા મન્દરાહુફણીશ્વરૈઃ ।
કુજેઽથ સુસ્તની મન્દે વ્યાધિદૌર્બલ્યસંયુતા ॥ ૯॥

કઠિનોર્ધ્વકુચાર્યે ચ શુક્રે સ્થૂલોત્તમસ્તની ।
પાપે દ્વાદશકામસ્થે ક્ષીણચન્દ્રસ્તુ પઞ્ચમે ॥ ૧૦॥

જાતશ્ચ ભાર્યાવશ્યઃ સ્યાદિતિ જાતિવિરોધકૃત્ ।
જામિત્રે મન્દભૌમે ચ તદીશે મન્દભૂમિજે ॥ ૧૧॥

વેશ્યા વા જારિણી વાઽપિ તસ્ય ભાર્યા ન સંશયઃ ।
ભૌમાંશકગતે શુક્રે ભૌમક્ષેત્રગતેઽથવા ॥ ૧૨॥

ભૌમયુક્તે ચ દૃષ્ટે વા ભગચુમ્બનભાગ્ ભવેત્ ।
મન્દાંશકગતે શુક્રે મન્દક્ષેત્રગતેઽપિ ચ ॥ ૧૩॥

મન્દયુક્તે ચ દૃષ્ટે ચ શિશ્નચુમ્બનતત્પરઃ ।
દારેશે સ્વોચ્ચરાશિસ્થે મદે શુભસમન્વિતે ॥ ૧૪॥

લગ્નેશો બલસંયુક્તઃ કલત્રસ્થાનસંયુતઃ ।
તદ્ભાર્યા સદ્ગુણોપેતા પુત્રપૌત્રપ્રવર્ધિની ॥ ૧૫॥

કલત્રે તત્પતૌ વાપિ પાપગ્રહસમન્વિતે ।
ભાર્યાહાનિં વદેત્ તસ્ય નિર્બલે ચ વિશેષતઃ ॥ ૧૬॥

ષષ્ઠાષ્ટમવ્યયસ્થાને મદેશો દુર્બલો યદિ ।
નીચરાશિગતો વાપિ દારનાશં વિનિર્દિશેત્ ॥ ૧૭॥

કલત્રસ્થાનગે ચન્દ્રે તદીશે વ્યયરાશિગે ।
કારકો બલહીનશ્ચ દારસૌખ્યં ન વિદ્યતે ॥ ૧૮॥

સપ્તમેશે સ્વનીચસ્થે પાપર્ક્ષે પાપસંયુતે ।
સપ્તમે ક્લીવરાશ્યંશે દ્વિભાર્યો જાતકો ભવેત્ ॥ ૧૯॥

કલત્રસ્થાનગે ભૌમે શુક્રે જામિત્રગે શનૌ ।
લગ્નેશે રન્ધ્રરાશિસ્થે કલત્રત્રયવાન્ ભવેત્ ॥ ૨૦॥

દ્વિસ્વભાવગતે શુક્રે સ્વોચ્ચે તદ્રાશિનાયકે ।
દારેશે બલસંયુક્તે બહુદારસમન્વિતઃ ॥ ૨૧॥

દારેશે શુભરાશિસ્થે સ્વોચ્ચસ્વર્ક્ષગતો ભૃગુઃ ।
પઞ્ચમે નવમેઽબ્દે તુ વિવાહઃ પ્રાયશો ભવેત્ ॥ ૨૨॥

દારસ્તાનં ગતે સૂર્યે તદીશે ભૃગુસંયુતે ।
સપ્તમૈકાદશે વર્ષે વિવાહઃ પ્રાયશો ભવેત્ ॥ ૨૩॥

કુટુમ્બસ્થાનગે શુક્રે દારેશે લાભરાશિગે ।
દશમે ષોડશાઽબ્દે ચ વિવાહઃ પ્રાયશો ભવેત્ ॥ ૨૪॥

લગ્નકેન્દ્રગતે શુક્રે લગ્નેશે મન્દરાશિગે ।
વત્સરૈકાદશે પ્રાપ્તે વિવાહં લભતે નરઃ ॥ ૨૫॥

લગ્નાત્ કેન્દ્રગતે શુક્રે તસ્માત્ કામગતે શનૌ ।
દ્વાદશૈકોનવિંશે ચ વિવાહઃ પ્રાયશો ભવેત્ ॥ ૨૬॥

ચન્દ્રાજ્જામિત્રગે શુક્રે શુક્રાજ્જામિત્રગે શનૌ ।
વત્સરેઽષ્ટાદશે પ્રાપ્તે વિવાહં લભતે નરઃ ॥ ૨૭॥

ધનેશે લાભરાશિસ્થે લગ્નેશે કર્મરાશિગે ।
અબ્દે પઞ્ચદશે પ્રાપ્તે વિવાહં લભતે નરઃ ॥ ૨૮॥

ધનેશે લાભરાશિસ્તે લાભેશે ધનરાશિગે ।
અબ્દે ત્રયોદશે પ્રાપ્તે વિવાહં લભતે નરઃ ॥ ૨૯॥

રન્ધ્રાજ્જામિત્રગે શુક્રે તદીશે ભૌમસંયુતે ।
દ્વાવિંશે સપ્તવિંશેઽબ્દે વિવાહં લભતે નરઃ ॥ ૩૦॥

દારાંશકગતે લગ્નનાથે દારેશ્વરે વ્યયે ।
ત્રયોવિંશે ચ ષડ્વિંશે વિવાહં લભતે નરઃ ॥ ૩૧॥

રન્ધ્રેશે દારરાશિસ્થે લગ્નાંશે ભૃગુસંયુતે ।
પઞ્ચવિંશે ત્રયસ્ત્રિંશે વિવાહં લભતે નરઃ ॥ ૩૨॥

ભાગ્યાદ્ભાગ્યગતે શુક્રે તદ્વ્યયે રાહુસંયુતે ।

એકત્રિંશાસ્ત્રયસ્ત્રિંશે દારલાભં વિનિર્દિશેત્ ॥ ૩૩॥

ભાગ્યાજ્જામિત્રગે શુક્રે તદ્દ્યૂને દારનાયકે ।
ત્રિંશે વા સપ્તવિંશાબ્દે વિવાહં લભતે નરઃ ॥ ૩૪॥

દારેશે નીચરાશિસ્થે શુક્રે રન્ધ્રારિસંયુતે ।
અષ્ટાદશે ત્રયસ્ત્રિંશે વત્સરે દારનાશનમ્ ॥ ૩૫॥

મદેશે નાશરાશિસ્થે વ્યયેશે મદરાશિગે ।
તસ્ય ચૈકોનવિંશાબ્દે દારનાશં વિનિર્દિશેત્ ॥ ૩૬॥

કુટુમ્બસ્થાનગો રાહુઃ કલત્રે ભૌમસંયુતે ।
પાણિગ્રહે ચ ત્રિદિને સર્પદષ્ટે વધૂમૃતિઃ ॥ ૩૭॥

રન્ધ્રસ્થાનગતે શુક્રે તદીશે સૌરિરાશિગે ।
દ્વાદશૈકોનવિંશાબ્દે દારનાશં વિનિર્દિશેત્ ॥ ૩૮॥

લગ્નેશે નીચરાશિસ્થે ધનેશે નિધનં ગતે ।
ત્રયોદશે તુ સમ્પ્રાપ્તે કલત્રસ્ય મૃતિર્ભવેત્ ॥ ૩૯॥

શુક્રાજ્જામિત્રગે ચન્દ્રે ચન્દ્રાજ્જામિત્રગે બુધે ।
રન્ધ્રેશે સુતભાવસ્થે પ્રથમં દશમાબ્દિકમ્ ॥ ૪૦॥

દ્વાવિંશે ચ દ્વિતીયં ચ ત્રયસ્ત્રિંશે તૃતીયકમ્ ।
વિવાહં લભતે મર્ત્યો નાઽત્ર કાર્યા વિચારણા ॥ ૪૧॥

ષષ્ઠે ચ ભવને ભૌમઃ સપ્તમે રાહુસંસ્થિતિઃ ।
અષ્ટમે ચ યદા સૌરિસ્તસ્ય ભાર્યા ન જીવતિ ॥ ૪૨॥

## અથ આયુર્ભાવફલાધ્યાયઃ ॥ ૧૯॥

આયુર્ભાવફલં ચાઽથ કથયામિ દ્વિજોત્તમ ।
આયુઃસ્થાનાધિપઃ કેન્દ્રે દીર્ઘમાયુઃ પ્રયચ્છતિ ॥ ૧॥

આયુસ્થાનાધિપઃ પાપૈઃ સહ તત્રૈવ સંસ્થિતઃ ।
કરોત્યલ્પાયુષં જાતં લગ્નેશોઽપ્યત્ર સંસ્થિતઃ ॥ ૨॥

એવં હિ શનિના ચિન્તા કાર્યા તર્કૈર્વિચક્ષણૈઃ ।
કર્માધિપેન ચ તથા ચિન્તનં કાર્યમાયુષઃ ॥ ૩॥

ષષ્ઠે વ્યયેઽપિ ષષ્ઠેશો વ્યયાધીશો રિપૌ વ્યયે ।
લગ્નેઽષ્ટમે સ્થિતો વાઽપિ દીર્ઘમાયુઃ પ્રયચ્છતિ ॥ ૪॥

સ્વસ્થાને સ્વાંશકે વાઽપિ મિત્રેશે મિત્રમન્દિરે ।
દીર્ઘાયુષં કરોત્યેવ લગ્નેશોઽષ્ટમપઃ પુનઃ ॥ ૫॥

લગ્નાષ્ટમપકર્મેશમન્દાઃ કેન્દ્રત્રિકોણયોઃ ।
લાભે વા સંસ્થિતાસ્તદ્વદ્ દિશેયુર્દીર્ઘમાયુષમ્ ॥ ૬॥

એવં બહુવિધા વિદ્વન્નાયુર્યોગાઃ પ્રકીર્તિતાઃ ।
એષુ યો બલવાંસ્તસ્યાઽનુસારાદાયુરાદિશેત્ ॥ ૭॥

અષ્ટમાધિપતૌ કેન્દ્રે લગ્નેશે બલવર્જતે ।
વિંશદ્વર્ષાણ્યસૌ જીવેદ્ દ્વાત્રિંશત્પરમાયુષમ્ ॥ ૮॥

રન્ધ્રેશે નીચરાશિસ્થે રન્ધ્રે પાપગ્રહૈર્યુતે ।
લગ્નેશે દુર્બલે જન્તુરલ્પાયુર્ભવતિ ધ્રુવમ્ ॥ ૯॥

રન્ધ્રેશે પાપસંયુક્તે રન્ધ્રે પાપગ્રહૈર્યુતે ।
વ્યયે ક્રૂરગ્રહાક્રાન્તે જાતમાત્રં મૃતિર્ભવેત્ ॥ ૧૦॥

કેન્દ્રત્રિકોણગાઃ પાપાઃ શુભાઃ ષષ્ઠાષ્ટગા યદિ ।
લગ્ને નીચસ્થરન્ધ્રેશો જાતઃ સદ્યો મૃતો ભવેત્ ॥ ૧૧॥

પઞ્ચમે પાપસંયુક્તે રન્ધ્રેશે પાપસંયુતે ।
રન્ધ્રે પાપગ્રહૈર્યુક્તે સ્વલ્પમાયુઃ પ્રજાયતે ॥ ૧૨॥

રન્ધ્રેશે રન્ધ્રરાશિસ્થે ચન્દ્રે પાપસમન્વિતે ।
શુભદૃષ્ટિવિહીને ચ માસાન્તે ચ મૃતિર્ભવેત્ ॥ ૧૩॥

લગ્નેશે સ્વોચ્ચરાશિસ્થે ચન્દ્રે લાભસમન્વિતે ।
રન્ધ્રસ્થાનગતે જીવે દીર્ઘમાયુર્ન સંશયઃ ॥ ૧૪॥

લગ્નેશોઽતિબલી દૃષ્ટઃ કેન્દ્રસંસ્થૈઃ શુભગ્રહૈઃ ।
ધનૈઃ સર્વગુણૈઃ સાર્ધં દીર્ઘમાયુઃ પ્રયચ્છતિ ॥ ૧૫॥

## અથ ભાગ્યભાવફલાધ્યાયઃ ॥ ૨૦॥

અથ ભાગ્યભાવં વિપ્ર ફલં વક્ષ્યે તવાઽગ્રતઃ ।

સબલો ભાગ્યપે ભાગ્યે જાતો ભાગ્યયુતો ભવેત્ ॥ ૧॥

ભાગ્યસ્થાનગતે જીવે યદીશે કેન્દ્રસંસ્થિતે ।
લગ્નેશે બલસંયુક્તે બહુભાગ્યયુતો ભવેત્ ॥ ૨॥

ભાગ્યેશે બલસંયુક્તે ભાગ્યે ભૃગુસમન્વિતે ।
લગ્નાત્ કેન્દ્રગતે જીવે પિતા ભાગ્યસમન્વિતઃ ॥ ૩॥

ભાગ્યસ્થાનાદ્ દ્વિતીયે વા સુખે ભૌમસમન્વિતે ।
ભાગ્યેશે નીચરાશિસ્થે પિતા નિર્ધન એવ હિ ॥ ૪॥

ભાગ્યેશે પરમોચ્ચસ્થે ભાગ્યાંશે જીવસંયુતે ।
લગ્નાચ્ચતુષ્ટયે શુક્રે તત્પિતા દીર્ઘજીવનઃ ॥ ૫॥

ભાગ્યેશે કેન્દ્રભાવસ્થે ગુરુણા ચ નિરીક્ષિતે ।
તત્પિતા વાહનૈર્યુક્તો રાજા વા તત્સમો ભવેત્ ॥ ૬॥

ભાગ્યેશે કર્મભાવસ્થે કર્મેશે ભાગ્યરાશિગે ।
શુભદૃષ્ટે ધનાઢ્યશ્ચ કીર્તિમાંસ્તત્પિતા ભવેત્ ॥ ૭॥

પરમોચ્ચાંશગે સૂર્યે ભાગ્યેશે લાભસંસ્થિતે ।
ધર્મિષ્ઠો નૃપવાત્સલ્યઃ પિતૃભક્તો ભવેન્નરઃ ॥ ૮॥

લગ્નાત્ત્રિકોણગે સૂર્યે ભાગ્યેશે સપ્તમસ્થિતે ।
ગુરુણા સહિતે દૃષ્ટે પિતૃભક્તિસમન્વિતઃ ॥ ૯॥

ભાગ્યેશે ધનભાવસ્થે ધનેશે ભાગ્યરાશિગે ।
દ્વાત્રિંશાત્પરતો ભાગ્યં વાહનં કીર્તિસમ્ભવઃ ॥ ૧૦॥

લગ્નેશે ભાગ્યરાશિસ્થે ષષ્ઠેશેન સમન્વિતે ।
અન્યોન્યવૈરં બ્રુવતે જનકઃ કુત્સિતો ભવેત્ ॥ ૧૧॥

કર્માધિપેન સહિતો વિક્રમેશોઽપિ નિર્બલઃ ।
ભાગ્યપો નીચમૂઢસ્થો યોગો ભિક્ષાશનપ્રદઃ ॥ ૧૨॥

ષષ્ઠાષ્ટમવ્યયે ભાનૂ રન્ધ્રેશે ભાગ્યસંયુતે ।
વ્યયેશે લગ્નરાશિસ્થે ષષ્ઠેશે પઞ્ચમે સ્થિતે ॥ ૧૩॥

જાતસ્ય જનનાત્પૂર્વં જનકસ્ય મૃતિર્ભવેત્ ।
રન્ધ્રસ્થાનગતે સૂર્યે રન્ધ્રેશે ભાગ્યભાવગે ॥ ૧૪॥

જાતસ્ય પ્રથમાબ્દે તુ પિતુર્મરણમાદિશેત્ ।
વ્યયેશે ભાગ્યરાશિસ્થે નીચાંશે ભાગ્યનાયકે ॥ ૧૫॥

તૃતીયે ષોડશે વર્ષે જનકસ્ય મૃતિર્ભવેત્ ।
લગ્નેશે નાશરાશિસ્થે રન્ધ્રેશે ભાનુસંયુતે ॥ ૧૬॥

દ્વિતીયે દ્વાદશે વર્ષે પિતુર્મરણમાદિશેત્ ।
ભાગ્યાદ્રન્ધ્રગતે રાહૌ ભાગ્યાદ્ભાગ્યગતે રવૌ ॥ ૧૭॥

ષોડશેઽષ્ટાદશે વર્ષે જનકસ્ય મૃતિર્ભવેત્ ।
રાહુણા સહિતે સૂર્યે ચન્દ્રાદ્ભાગ્યગતે શનૌ ॥ ૧૮॥

સપ્તમૈકોનવિંશાબ્દે તાતસ્ય મરણં ધ્રુવમ્ ।
ભાગ્યેશે વ્યયરાશિસ્થે વ્યયેશે ભાગ્યરાશિગે ॥ ૧૯॥

વદાબ્ધિમિતવર્ષાચ્ચ પિતુર્મરણમાદિશેત્ ।
રવ્યંશે ચ સ્થિતે ચન્દ્રે લગ્નેશે રન્ધ્રસંયુતે ॥ ૨૦॥

પઞ્ચત્રિંશૈકચત્વારિંશદ્વર્ષે મરણં પિતુઃ ।
પિતૃસ્થાનાધિપે સૂર્યે મન્દભૌમસમન્વિતે ॥ ૨૧॥

પઞ્ચાશદ્વત્સરે પ્રાપ્તે જનકસ્ય મૃતિર્ભવેત્ ।
ભાગ્યાત્ સપ્તમગે સૂર્યે ભ્રાતૃસપ્તમગસ્તમઃ ॥ ૨૨॥

ષષ્ઠેઽબ્દે પઞ્ચવિંશાબ્દે પિતુર્મરણમાદિશેત્ ।
રન્ધ્રજામિત્રગે મન્દે મન્દાજ્જામિત્રગે રવૌ ॥ ૨૩॥

ત્રિંશૈકવિંશે ષડ્વિંશે જનકસ્ય મૃતિર્ભવેત્ ।
ભાગ્યેશે નીચરાશિસ્થે તદીશે ભાગ્યરાશિગે ॥ ૨૪॥

ષડ્વિંશેઽબ્દે ત્રયસ્ત્રિંશે પિતુર્મરણમાદિશેત્ ।
એવં જાતસ્ય દૈવજ્ઞો ફલં જ્ઞાત્વા વિનિર્દિશેત્ ॥ ૨૫॥

પરમોચ્ચાંશગે શુક્રે ભાગ્યેશેન સમન્વિતે ।
ભ્રાતૃસ્થાને શનિયુતે બહુભાગ્યાધિપો ભવેત્ ॥ ૨૬॥

ગુરુણા સંયુતે ભાગ્યે તદીશે કેન્દ્રરાશિગે ।
વિંશદ્વર્ષાત્ પરં ચૈવ બહુભાગ્યં વિનિર્દિશેત્ ॥ ૨૭॥

પરમોચ્ચાંશગે સૌમ્યે ભાગ્યેશે ભાગ્યરાશિગે ।
ષટ્ત્રિંશાચ્ચ પરં ચૈવ બહુભાગ્યં વિનિર્દિશેત્ ॥ ૨૮॥

લગ્નેશે ભાગ્યરાશિસ્થે ભાગ્યેશે લગ્નસંયુતે ।
ગુરુણા સંયુતે દ્યૂને ધનવાહનલાભકૃત્ ॥ ૨૯॥

ભાગ્યાદ્ભાગ્યવતો રાહુસ્તદીશે નિધનં ગતે ।
ભાગ્યેશે નીચરાશિસ્થે ભાગ્યહીનો ભવેન્નરઃ ॥ ૩૦॥

ભાગ્યસ્થાનગતે મન્દે શશિના ચ સમન્વિતે ।
લગ્નેશે નીચરાશિસ્થે ભિક્ષાશી ચ નરો ભવેત્ ॥ ૩૧॥

એવં ભાગ્યફલં વિપ્ર સઙ્ક્ષેપાત્ કથિતં મયા ।
લગ્નેશભાગ્યભાવેશસ્થિત્યાઽન્યદપિ નિર્દિશેત્ ॥ ૩૨॥

Encoded by ajarve at fms30.cca.rockwell.com (Ahto Jarve)
Proofread by Ahto Jarve, Ginda Lass

*bRihatpArAsharahorAshAstram 11-20*
pdf was typeset on December 30, 2021

Please send corrections to *sanskrit@cheerful.com*